# Shri Bala Sagunamanasapuja

# શ્રીબાલાસગુણમાનસપૂજા

## Document Information


Text title : bAlAsaguNamAnasapUjA

File name : bAlAsaguNamAnasapUjA.itx

Category : devii, dashamahAvidyA, devI, pUjA

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાસગુણમાનસપૂજા

પ્રબોધનં

૧૦. ઉષસિ માગધમઙ્ગગાયનૈઃ ઝટિતિ જાગૃહિ જાગૃહિ જાગૃહિ । -
(૧૦. ૐ ઐં હ્રીં શ્રીં ઐં ક્લીં સૌઃ સૌઃ ક્લીં ઐં ઇત્યસ્ય સઙ્કેતઃ) -
અતિકૃપાર્દ્રકટાક્ષનિરીક્ષણૈઃ જગદિદં જગદમ્બ સુખીકુરુ ॥

મણ્ડપપ્રવેશઃ

૧૦. કનકમયવિતર્દિશોભમાનં દિશિદિશિ પૂર્ણસુવર્ણકુમ્ભયુક્તમ્ ।
મણીમયમણ્ડપમધ્યમેહિ માતઃ મયિ કૃપયાશુ સમર્ચનં ગ્રહીતુમ્ ॥

કનકમયવિતર્દિસ્થાપિતે તૂલિકાઢ્યે
વિવિધકુસુમકીર્ણે કોટિબાલાર્કવર્ણે ।
ભગવતિ રમણીયે રત્નસિંહાસનેઽસ્મિન્
ઉપવિશ પદયુગ્મં હેમપીઠે નિધાય ॥

—- પાદ્યં

૧૦. દૂર્વયા સરસિજાન્વિતવિષ્ણુક્રાન્તયા ચ સહિતં કુસુમાઢ્યમ્ ।
પદ્મયુગ્મસદૃશે પદયુગ્મે પાદ્યમેતદુરરીકુરુ માતઃ ॥

અર્ઘ્યં

૧૦. ગન્ધપુષ્પયવસર્ષપદૂર્વાસંયુતં તિલકુશાક્ષતમિશ્રમ્ ।
હેમપાત્રનિહિતં સહરત્નૈઃ અર્ઘ્યમેતદુરરીકુરુ માતઃ ॥

આચમનં

૧૦. જલજદ્યુતિના કરેણ જાતીફલતક્કોલલવઙ્ગગન્ધમિશ્રૈઃ ।
અમૃતૈરમૃતૈરિવાતિશીતૈઃ ભગવત્યાચમનં વિધીયતામ્ ॥

મધુપર્કઃ

૧૦. નિહિતં કનકસ્ય સમ્પુટે પિહિતં રત્નપિધાનકેન યત્ ।
તદિદં જગદમ્બ તેઽર્પિતં મધુપર્કં જનનિ પ્રગૃહ્યતામ્ ॥

સ્નાનં

૧૦. એતચ્ચમ્પકતૈલમમ્બ વિવિધૈઃ પુષ્પૈર્મુહુર્વાસિતં
ન્યસ્તં રત્નમયે સુવર્ણચષકે ભૃઙ્ગૈર્ભ્રમદ્ભિર્વૃતમ્ ।
સાનન્દં સુરસુન્દરીભિરભિતો હસ્તૈર્ધૃતં તે મયા
કેશેષુ ભ્રમરભ્રમેષુ સકલેષ્વઙ્ગેષુ ચાલિપ્યતે ॥

માતઃ કુઙ્કુમપઙ્કનિર્મિતમિદં દેહે તવોદ્વર્તનં
ભક્ત્યાહં કલયામિ હેમરજસ સમ્મિશ્રિતં કેસરૈઃ ।
કેશાનામલકૈર્વિશોધ્ય વિશદાન્કસ્તૂરિકોદઞ્ચિતૈઃ
સ્નાનં તે નવરત્નકુમ્ભસહિતૈઃ સંવાસિતોષ્ણોદકૈઃ ॥

દધિદુગ્ધઘૃતૈઃ સમાક્ષિકૈઃ સિતયા શર્કરયા સમન્વિતૈઃ ।
સ્નપયામિ તવાહમાદરાજ્જનનિ ત્વાં પુનરુષ્ણવારિભિઃ ॥

એલોશીરસુવાસિતૈઃ સુકુસુમૈર્ગઙ્ગાદિતીર્થોદકૈઃ
માણિક્યામલમૌક્તિકામૃતરસૈઃ સ્વચ્છૈઃ સુવર્ણોદકૈઃ ।
મન્ત્રાન્વૈદિકતાન્ત્રિકાન્પરિપઠન્ સાનન્દમત્યાદરાત્
સ્નાનં તે પરિકલ્પયામિ જનનિ સ્નેહાત્ત્વમઙ્ગીકુરુ ॥

વસ્ત્રધારણં કેશપ્રસાધનં ચ

૧૦. બાલાર્કદ્યુતિદાડિમીયકુસુમપ્રસ્પર્ધિ સર્વોત્તમં
માતસ્ત્વં પરિધેહિ દિવ્યવસનં ભાક્ત્યા મયા કલ્પિતમ્ ।
મુક્તાભિર્ગ્રથિતં સુકઞ્ચુકમિદં સ્વીકૃત્ય પીતપ્રભં
તપ્તસ્વર્ણસમાનવર્ણમતુલં પ્રાવર્ણમઙ્ગીકુરુ ॥

૧૦. બહુભિરગરુધૂપૈઃ સાદરં ધૂપયિત્વા
ભાગવતિ તવ કેશાન્કઙ્કતૈર્માર્જયિત્વા ।
સુરભિભિરરવિન્દૈશ્ચમ્પકૈશ્ચાર્ચયિત્વા
ઝટિતિ કનકસૂત્રૈર્જૂટયન્વેષ્ટયામિ ॥

આભરણભૂષણં

૧૦. મઞ્જીરે પદયોર્નિધાય રુચિરાં વિન્યસ્ય કાઞ્ચીં કટૌ
મુક્તાહારમુરોજયોરનુપમાં નક્ષત્રમાલાં ગલે ।
કેયૂરાણિ ભુજેષુ રત્નવલયશ્રેણીં કરેષુ ક્રમાત્
તાટઙ્કે તવ કર્ણયોર્વિનિદધે શીર્ષે ચ ચૂડામણિમ્ ॥

ધમ્મિલ્લે તવ દેવિ હેમકુસુમાન્યાધાય ફાલસ્થલે

મુક્તારાજિવિરાજમાનતિલકં નાસાપુટે મૌક્તિકમ્ ।
માતર્મૌક્તિકજાલિકાં ચ કુચયોઃ સર્વાઙ્ગુલીષૂર્મિકાઃ
કાટ્યાં કાઞ્ચનકિઙ્કિણીર્વિનિદધે રત્નાવતંસં શ્રુતૌ ॥

ગન્ધકુઙ્કુમાક્ષતધારણં
(૧૦) માતઃ ફાલતલે તવાતિવિમલે કાશ્મીરકસ્તૂરિકા-
કર્પૂરાગરુભિઃ કરોમિ તિલકં દેહેઽઙ્ગરાગં તતઃ ।
વક્ષોજાદિષુ યક્ષકર્દમરસં સિક્ત્વા ચ પુષ્પદ્રવં
પાદૌ ચન્દનલેપનાદિભિરહં સમ્પૂજયામિ ક્રમાત્ ॥

(૧૦) રત્નાક્ષતૈસ્ત્વાં પરિપૂજયામિ મુક્તાફલૈર્વા રુચિરૈરવિદ્ધૈઃ ।
અખણ્ડિતૈર્દેવિ યવાદિભિર્વા કાશ્મીરપઙ્કાઙ્કિતતણ્ડુલૈર્વા ॥

(૧૦) સીમન્તે તે ભગવતિ મયા સાદરં ન્યસ્તમેતત્
સિન્દૂરં મે હૃદયકમલે હર્ષવર્ષં તનોતિ ।
બાલાદિત્યદ્યુતિરિવ સદા લોહિતા યસ્ય કાન્તિઃ
અન્તર્ધ્વાન્તં હરતિ સકલં ચેતસા ચિન્તયૈવ ॥

પુષ્પાલઙ્કરણં
૧૦. મન્દાકુન્દકરવીરલવઙ્ગપુષ્પૈઃ
ત્વાં દેવિ સન્તતમહં પરિપૂજયામિ
જાતીજપાવકુલચમ્પકકેતકાદિ -
નાનાવિધાનિ કુસુમાનિ ચ તેઽર્પયામિ ॥

માલતીવકુલહેમપુષ્પિકા કાઞ્ચનારકરવીરકૈતકૈઃ ।
કર્ણિકારગિરિકર્ણિકાદિભિઃ પૂજયામિ જગદમ્બ તે વપુઃ ॥

પારિજાતશતપત્રપાટલૈર્મલ્લિકાવકુલચમ્પકાદિભિઃ ।
અમ્બુજૈઃ સુકુસુમૈશ્ચ સાદરં પૂજયામિ જગદમ્બ તે વપુઃ ॥

ધૂપઃ
૧૦. લાક્ષાસમ્મિલિતૈઃ સિતાભ્રસહિતૈઃ શ્રીવાસસમ્મિશ્રિતૈઃ
કર્પૂરાકલિતૈઃ શિરૈર્મધુયુતૈર્ગોસર્પિષા લોડિતૈઃ ।
શ્રીકણ્ઠાગરુગુગ્ગુલુપ્રભૃતિભિર્નાનાવિધૈર્વસ્તુભિઃ
ધૂપં તે પરિકલ્પયામિ જનનિ સ્નેહાત્ત્વમઙ્ગીકુરુ ॥

દીપઃ

૧૦. રત્નાલઙ્કૃતહેમપાત્રનિહિતૈર્ગોસર્પિષા લોડિતૈઃ
દીપૈર્દીર્ઘતરાન્ધકારભિદુરૈઃ બાલાર્કકોટિપ્રભૈઃ ।
આતામ્રજ્વલદુજ્જ્વલપ્રવિલસદ્રત્નપ્રદીપૈસ્તથા
માતસ્ત્વામહમાદરાદનુદિનં નીરાજયામ્યુચ્ચકૈઃ ॥

નિવેદનં

૧૦. માતસ્ત્વાં દધિદુગ્ધપાયસમહાશાલ્યન્નસન્તાનિકા -
સૂપાપૂપસિતાઘૃતૈઃ સવટકૈઃ સક્ષૌદ્રરમ્ભાફલૈઃ ।
એલાજીરકહિઙ્ગુનાગરનિશાકુસ્તુમ્ભરીસંસ્કૃતૈઃ
શાકૈઃ સાકમહં સુધાધિકરસૈઃ સન્તર્પયામ્યર્ચયન્ ॥

સાપૂપસૂપદધિદુગ્ધસુધાઘૃતાનિ
સુસ્વાદુભક્તપરમાન્નપુરસ્સરાણિ ।
શાકોલ્લસન્મરિચજીરક બાહ્લિકાનિ
ભાક્ષ્યાણિ ભુઙ્ક્ષ્વ જગદમ્બ મયાર્પિતાનિ ॥

ક્ષીરમેતદિદમુત્તમોત્તમં પ્રાજ્યમાજ્યમિદમુજ્જ્વલં મધુ ।
માતરેતદમૃતોપમં પયઃ સમ્ભ્રમેણ પરિપીયતાં મુહુઃ ॥

ઉષ્ણોદકૈઃ પાણિયુગં મુખં ચ પ્રક્ષાલ્ય માતઃ કલધૌતપાત્રે ।
કર્પૂરમિશ્રેણ સકુઙ્કુમેન હસ્તૌ સમુદ્વર્તય ચન્દનેન ॥

અતિશીતમુશીરવાસિતં તપનીયે કલશે નિવેશિતમ્ ।
પટપૂતમિદં જિતામૃતં શુચિ ગઙ્ગાજલમમ્બ પીયતામ્ ॥

જમ્બ્વામ્રરમ્ભાફલસંયુતાનિ દ્રાક્ષાફલક્ષૌદ્રસમન્વિતાનિ ।
સનારિકેલાનિ સદાડિમાનિ ફલાનિ તે દેવિ સમર્પયામિ ॥

કૂશ્માણ્ડકોશાટકિસંયુતાનિ જમ્બીરનારઙ્ગસમન્વિતાનિ ।
સબીજપૂરાણિ સબાદરાણિ ફલાનિ તે દેવિ સમર્પયામિ ॥

તામ્બૂલં

૧૦. કર્પૂરેણ યુતૈર્લવઙ્ગસહિતૈસ્તક્કોલચૂર્ણાન્વિતૈઃ
સુસ્વાદુક્રમુકૈઃ સગૌરખદિરૈઃ સુસ્નિગ્ધજાતીફલૈઃ ।
માતઃ કૈતકપત્રપાણ્ડુરુચિભિસ્તામ્બૂલવલ્લીદલૈઃ
સાનન્દં મુખમણ્ડનાર્થમતુલં તામ્બૂલમઙ્ગીકુરુ ॥

ગોધૂમદીપારાધનં

૧૦. સવિનયમથ દત્વા જાનુયુગ્મં ધરણ્યાં
સપદિ શિરસિ ધૃત્વા પાત્રમારાર્તિકસ્ય ।
મુખકમલસમીપે તેઽમ્બ સાર્થં ત્રિવારં
ભ્રમયતિ મયિ ભૂયાત્તે કૃપાર્દ્રઃ કટાક્ષઃ ॥

સ્વર્ણમન્ત્રપુષ્પાઞ્જલિઃ
૧૦. અથ બહુમણીમિશ્રૈઃ મૌક્તિકૈસ્ત્વાં વિકીર્ય
ત્રિભુવનકમનીયૈઃ પૂજયિત્વા ચ વસ્ત્રૈઃ ।
મિલિતવિવિધમુક્તાં દિવ્યમાણિક્યયુક્તાં
જનનિ કનકવૃષ્ટિં દક્ષિણાં તેઽર્પયામિ ॥

ચરણનલિનયુગ્મં પઙ્કજૈઃ પૂજયિત્વા
કનકકમલમાલાં કણ્ઠદેશેઽર્પયિત્વા ।
શિરસિ વિનિહિતોઽયં રત્નપુષ્પાઞ્જલિસ્તે
હૃદયકમલમધ્યે દેવિ હર્ષં તનોતુ ॥

ઇતિ શ્રીબાલાસગુણમાનસપૂજા સમાપ્તા ।

Proofread by PSA Easwaran

---

*Shri Bala Sagunamanasapuja*
pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*